# श्रीमद् भागवत रसिक कुटुंब

## श्रीदुर्गासप्तशती (पंचम अध्याय)

॥ श्रीदुर्गायै नमः ॥

॥ अथ श्रीदुर्गासप्तशती ॥

॥ अथ पञ्चमोऽध्यायः ॥

विनियोगः

अस्य श्री उत्तरचरित्रस्य रुद्र ऋषिः ।

श्रीमहासरस्वती देवता ।

अनुष्टुप् छन्दः । भीमा शक्तिः । भ्रामरी बीजम् ।

सूर्यस्तत्त्वम् ।

सामवेदः(स्) स्वरूपम् । श्रीमहासरस्वतीप्रीत्यर्थे

उत्तरचरित्रपाठे विनियोगः ।

। ध्यानम् ।

ॐ घण्टाशूलहलानि शङ्खमुसले चक्रं(न्) धनुः(स्) सायकं(म्),

हस्ताब्जैर्दधतीं(ङ्) घनान्तविलसच्छीतां(म्)शुतुल्यप्रभाम् ।

गौरीदेहसमुद्भवां(न्) त्रिजगतामाधारभूतां(म्) महा-

पूर्वामत्र सरस्वतीमनुभजे शुम्भादिदैत्यार्दिनीम् ॥

‘ॐ क्लीं’ ऋषिरुवाच ॥ 1॥

पुरा शुम्भनिशुम्भाभ्या- मसुराभ्यां(म्) शचीपतेः ।
त्रैलोक्यं(यँ) यज्ञभागाश्च, हृता मदबलाश्रयात् ॥ 2॥

तावेव सूर्यतां(न्) तद्व-दधिकारं(न्) तथैन्दवम् ।
कौबेरमथ याम्यं(ञ्) च, चक्राते वरुणस्य च ॥ 3॥

तावेव पवनर्द्धिं(ञ्) च, चक्रतुर्वह्निकर्म च ।
ततो देवा विनिर्धूता, भ्रष्टराज्याः(फ्) पराजिताः ॥ 4॥

हृताधिकारास्त्रिदशास्-ताभ्यां(म्) सर्वे निराकृताः ।
महासुराभ्यां(न्) तां(न्) देवीं(म्), सं(म्)स्मरन्त्यपराजिताम् ॥ 5॥

तयास्माकं(वँ) वरो दत्तो, यथाऽऽपत्सु स्मृताखिलाः ।
भवतां(न्) नाशयिष्यामि, तत्क्षणात्परमापदः ॥ 6॥

इति कृत्वा मतिं(न्) देवा, हिमवन्तं(न्) नगेश्वरम् ।
जग्मुस्तत्र ततो देवीं(वँ), विष्णुमायां(म्) प्रतुष्टुवुः ॥ 7॥

देवा ऊचुः ॥ 8॥

नमो देव्यै महादेव्यै, शिवायै सततं(न्) नमः ।
नमः(फ्) प्रकृत्यै भद्रायै, नियताः(फ्) प्रणताः(स्) स्म ताम् ॥ 9॥

रौद्रायै नमो नित्यायै, गौर्यै धात्र्यै नमो नमः ।
ज्योत्स्नायै चेन्दुरूपिण्यै, सुखायै सततं(न्) नमः ॥ 10॥

कल्याण्यै प्रणतां(वृँ) वृद्ध्यै, सिद्ध्यै कुर्मो नमो नमः ।
नैर्ऋत्यै भूभृतां(लँ) लक्ष्म्यै, शर्वाण्यै ते नमो नमः ॥ 11॥

दुर्गायै दुर्गपारायै, सारायै सर्वकारिण्यै ।
ख्यात्यै तथैव कृष्णायै, धूम्रायै सततं(न्) नमः ॥ 12॥

अतिसौम्यातिरौद्रायै, नतास्तस्यै नमो नमः ।
नमो जगत्प्रतिष्ठायै, देव्यै कृत्यै नमो नमः ॥ 13॥

या देवी सर्वभूतेषु, विष्णुमायेति शब्दिता ।
नमस्तस्यै नमस्तस्यै, नमस्तस्यै नमो नमः ॥ 14-16॥

या देवी सर्वभूतेषु, चेतनेत्यभिधीयते ।
नमस्तस्यै नमस्तस्यै, नमस्तस्यै नमो नमः ॥ 17-19॥

या देवी सर्वभूतेषु, बुद्धिरूपेण सं(म्)स्थिता ।
नमस्तस्यै नमस्तस्यै, नमस्तस्यै नमो नमः ॥ 20-22॥

या देवी सर्वभूतेषु, निद्रारूपेण सं(म्)स्थिता ।
नमस्तस्यै नमस्तस्यै, नमस्तस्यै नमो नमः ॥ 23-25॥

या देवी सर्वभूतेषु, क्षुधारूपेण सं(म्)स्थिता ।
नमस्तस्यै नमस्तस्यै, नमस्तस्यै नमो नमः ॥ 26-28॥

या देवी सर्वभूतेषु, छायारूपेण सं(म्)स्थिता ।
नमस्तस्यै नमस्तस्यै, नमस्तस्यै नमो नमः ॥ 29-32॥

या देवी सर्वभूतेषु, शक्तिरूपेण सं(म्)स्थिता ।
नमस्तस्यै नमस्तस्यै, नमस्तस्यै नमो नमः ॥ 32-34॥

या देवी सर्वभूतेषु, तृष्णारूपेण सं(म्)स्थिता ।
नमस्तस्यै नमस्तस्यै, नमस्तस्यै नमो नमः ॥ 35-37॥

या देवी सर्वभूतेषु, क्षान्तिरूपेण सं(म्)स्थिता ।
नमस्तस्यै नमस्तस्यै, नमस्तस्यै नमो नमः ॥ 38-40॥

या देवी सर्वभूतेषु, जातिरूपेण सं(म्)स्थिता ।
नमस्तस्यै नमस्तस्यै, नमस्तस्यै नमो नमः ॥ 41-43॥

या देवी सर्वभूतेषु, लज्जारूपेण सं(म्)स्थिता ।
नमस्तस्यै नमस्तस्यै, नमस्तस्यै नमो नमः ॥ 44-46॥

या देवी सर्वभूतेषु, शान्तिरूपेण सं(म्)स्थिता ।
नमस्तस्यै नमस्तस्यै, नमस्तस्यै नमो नमः ॥ 47-49॥

या देवी सर्वभूतेषु, श्रद्धारूपेण सं(म्)स्थिता ।
नमस्तस्यै नमस्तस्यै, नमस्तस्यै नमो नमः ॥ 50-52॥

या देवी सर्वभूतेषु, कान्तिरूपेण सं(म्)स्थिता ।
नमस्तस्यै नमस्तस्यै, नमस्तस्यै नमो नमः ॥ 53-55॥

या देवी सर्वभूतेषु, लक्ष्मीरूपेण सं(म्)स्थिता ।
नमस्तस्यै नमस्तस्यै, नमस्तस्यै नमो नमः ॥ 56-58॥

या देवी सर्वभूतेषु, वृत्तिरूपेण सं(म्)स्थिता ।
नमस्तस्यै नमस्तस्यै, नमस्तस्यै नमो नमः ॥ 59-61॥

या देवी सर्वभूतेषु, स्मृतिरूपेण सं(म्)स्थिता ।
नमस्तस्यै नमस्तस्यै, नमस्तस्यै नमो नमः ॥ 62-64॥

या देवी सर्वभूतेषु, दयारूपेण सं(म्)स्थिता ।
नमस्तस्यै नमस्तस्यै, नमस्तस्यै नमो नमः ॥ 65-67॥

या देवी सर्वभूतेषु, तुष्टिरूपेण सं(म्)स्थिता ।
नमस्तस्यै नमस्तस्यै, नमस्तस्यै नमो नमः ॥ 68-70॥

या देवी सर्वभूतेषु, मातृरूपेण सं(म्)स्थिता ।
नमस्तस्यै नमस्तस्यै, नमस्तस्यै नमो नमः ॥ 71-73॥

या देवी सर्वभूतेषु, भ्रान्तिरूपेण सं(म्)स्थिता ।
नमस्तस्यै नमस्तस्यै, नमस्तस्यै नमो नमः ॥ 74-76॥

इन्द्रियाणामधिष्ठात्री, भूतानां(ञ्) चाखिलेषु या ।
भूतेषु सततं(न्) तस्यै, व्याप्तिदेव्यै नमो नमः ॥ 77॥

चितिरूपेण या कृत्स्न- मेतद् व्याप्य स्थिता जगत् ।
नमस्तस्यै नमस्तस्यै, नमस्तस्यै नमो नमः ॥ 78-80॥

स्तुता सुरैः(फ्) पूर्वमभीष्टसं(म्)श्रयात्-
तथा सुरेन्द्रेण दिनेषु सेविता ।
करोतु सा नः(श्) शुभहेतुरीश्वरी,
शुभानि भद्राण्यभिहन्तु चापदः ॥ 81॥

या साम्प्रतं(ञ्) चोद्धतदैत्यतापितै-
रस्माभिरीशा च सुरैर्नमस्यते ।
या च स्मृता तत्क्षणमेव हन्ति नः(स्),
सर्वापदो भक्तिविनम्रमूर्तिभिः ॥ 82॥

ऋषिरुवाच ॥ 83॥

एवं(म्) स्तवाभियुक्तानां(न्), देवानां(न्) तत्र पार्वती ।
स्नातुमभ्याययौ तोये, जाह्नव्या नृपनन्दन ॥ 84॥

साब्रवीत्तान् सुरान् सुभ्रूर्-भवद्भिः(स्) स्तूयतेऽत्र का ।
शरीरकोशतश्चास्याः(स्), समुद्भूताब्रवीच्छिवा ॥ 85॥

स्तोत्रं(म्) ममैतत् क्रियते, शुम्भदैत्यनिराकृतैः ।
देवैः(स्) समेतैः(स्) समरे, निशुम्भेन पराजितैः ॥ 86॥

शरीरकोशाद्यत्तस्याः(फ्), पार्वत्या निःसृताम्बिका ।
कौशिकीति समस्तेषु, ततो लोकेषु गीयते ॥ 87॥

तस्यां(वँ) विनिर्गतायां(न्) तु, कृष्णाभूत्सापि पार्वती ।
कालिकेति समाख्याता, हिमाचलकृताश्रया ॥ 88॥

ततोऽम्बिकां(म्) परं(म्) रूपं(म्), बिभ्राणां(म्) सुमनोहरम् ।
ददर्श चण्डो मुण्डश्च, भृत्यौ शुम्भनिशुम्भयोः ॥ 89॥

ताभ्यां(म्) शुम्भाय चाख्याता, अतीव सुमनोहरा ।
काप्यास्ते स्त्री महाराज, भासयन्ती हिमाचलम् ॥ 90॥

नैव तादृक् क्वचिद्रूपं(न्), दृष्टं(ङ्) केनचिदुत्तमम् ।
ज्ञायतां(ङ्) काप्यसौ देवी, गृह्यतां(ञ्) चासुरेश्वर ॥ 91॥

स्त्रीरत्नमतिचार्वङ्गी, द्योतयन्ती दिशस्त्विषा ।
सा तु तिष्ठति दैत्येन्द्र, तां(म्) भवान् द्रष्टुमर्हति ॥ 92॥

यानि रत्नानि मणयो, गजाश्वादीनि वै प्रभो ।
त्रैलोक्ये तु समस्तानि, साम्प्रतं(म्) भान्ति ते गृहे ॥ 93॥

ऐरावतः(स्) समानीतो, गजरत्नं(म्) पुरन्दरात् ।
पारिजाततरुश्चायं(न्), तथैवोच्चैः(श्)श्रवा हयः ॥ 94॥

विमानं(म्) हं(म्)ससं(यँ)युक्त-मेतत्तिष्ठति तेऽङ्गणे ।
रत्नभूतमिहानीतं(यँ), यदासीद्वेधसोऽद्भुतम् ॥ 95॥

निधिरेष महापद्मः(स्), समानीतो धनेश्वरात् ।
किञ्जल्किनीं(न्) ददौ चाब्धिर्-मालामम्लानपङ्कजाम् ॥ 96॥

छत्रं(न्) ते वारुणं(ङ्) गेहे, काञ्चनस्रावि तिष्ठति ।
तथायं(म्) स्यन्दनवरो, यः(फ्) पुराऽऽसीत्प्रजापतेः ॥ 97॥

मृत्योरुत्क्रान्तिदा नाम, शक्तिरीश त्वया हृता ।
पाशः(स्) सलिलराजस्य, भ्रातुस्तव परिग्रहे ॥ 98॥

निशुम्भस्याब्धिजाताश्च, समस्ता रत्नजातयः ।
वह्निरपि ददौ तुभ्य-मग्निशौचे च वाससी ॥ 99॥

एवं(न्) दैत्येन्द्र रत्नानि, समस्तान्याहृतानि ते ।
स्त्रीरत्नमेषा कल्याणी, त्वया कस्मान्न गृह्यते ॥ 100॥

ऋषिरुवाच ॥ 101॥

निशम्येति वचः(श्) शुम्भः(स्), स तदा चण्डमुण्डयोः ।
प्रेषयामास सुग्रीवं(न्), दूतं(न्) देव्या महासुरम् ॥ 102॥

इति चेति च वक्तव्या, सा गत्वा वचनान्मम ।
यथा चाभ्येति सम्प्रीत्या, तथा कार्यं(न्) त्वया लघु ॥ 103॥

स तत्र गत्वा यत्रास्ते, शैलोद्देशेऽतिशोभने ।
सा देवी मां(न्) ततः(फ्) प्राह, श्लक्ष्णं(म्) मधुरया गिरा ॥ 104॥

दूत उवाच ॥ 105॥

देवि दैत्येश्वरः(श्) शुम्भस्-त्रैलोक्ये परमेश्वरः ।
दूतोऽहं(म्) प्रेषितस्तेन, त्वत्सकाशमिहागतः ॥ 106॥

अव्याहताज्ञः(स्) सर्वासु, यः(स्) सदा देवयोनिषु ।
निर्जिताखिलदैत्यारिः(स्), स यदाह शृणुष्व तत् ॥ 107॥

मम त्रैलोक्यमखिलं(म्), मम देवा वशानुगाः ।
यज्ञभागानहं(म्) सर्वा-नुपाश्नामि पृथक् पृथक् ॥ 108॥

त्रैलोक्ये वररत्नानि, मम वश्यान्यशेषतः ।
तथैव गजरत्नं(ञ्) च, हृत्वा देवेन्द्रवाहनम् ॥ 109॥

क्षीरोदमथनोद्‌भूत-मश्वरत्नं(म्) ममामरैः ।
उच्चैः(श्)श्रवससं(ञ्)ज्ञं(न्) तत्-प्रणिपत्य समर्पितम् ॥ 110॥

यानि चान्यानि देवेषु, गन्धर्वेषूरगेषु च ।
रत्नभूतानि भूतानि, तानि मय्येव शोभने ॥ 111॥

स्त्रीरत्नभूतां(न्) त्वां(न्) देवि, लोके मन्यामहे वयम् ।
सा त्वमस्मानुपागच्छ, यतो रत्नभुजो वयम् ॥ 112॥

मां(वँ) वा ममानुजं(वँ) वापि, निशुम्भमुरुविक्रमम् ।
भज त्वं(ञ्) चञ्चलापाङ्गि, रत्नभूतासि वै यतः ॥ 113॥

परमैश्वर्यमतुलं(म्), प्राप्स्यसे मत्परिग्रहात् ।
एतद्‌बुद्ध्या समालोच्य, मत्परिग्रहतां(वँ) व्रज ॥ 114॥

ऋषिरुवाच ॥ 115॥

इत्युक्ता सा तदा देवी, गम्भीरान्तः(स्)स्मिता जगौ ।
दुर्गा भगवती भद्रा, ययेदं(न्) धार्यते जगत् ॥ 116॥

देव्युवाच ॥ 117॥

सत्यमुक्तं(न्) त्वया नात्र, मिथ्या किञ्चित्त्वयोदितम् ।
त्रैलोक्याधिपतिः(श्) शुम्भो, निशुम्भश्चापि तादृशः ॥ 118॥

किं(न्) त्वत्र यत्प्रतिज्ञातं(म्),  मिथ्या तत्क्रियते कथम् ।
श्रूयतामल्पबुद्धित्वात्- प्रतिज्ञा या कृता पुरा ॥ 119॥

यो मां(ञ्) जयति सङ्ग्रामे, यो मे दर्पं(वँ) व्यपोहति ।
यो मे प्रतिबलो लोके, स मे भर्ता भविष्यति ॥ 120॥

तदागच्छतु शुम्भोऽत्र, निशुम्भो वा महासुरः ।
मां(ञ्) जित्वा किं(ञ्) चिरेणात्र, पाणिं(ङ्) गृह्णातु मे लघु ॥ 121॥

दूत उवाच ॥ 122॥

अवलिप्तासि मैवं(न्) त्वं(न्), देवि ब्रूहि ममाग्रतः ।
त्रैलोक्ये कः(फ्) पुमां(म्)स्तिष्ठे- दग्रे शुम्भनिशुम्भयोः ॥ 123॥

अन्येषामपि दैत्यानां(म्), सर्वे देवा न वै युधि ।
तिष्ठन्ति सम्मुखे देवि, किं(म्) पुनः(स्) स्त्री त्वमेकिका ॥ 124॥

इन्द्राद्याः(स्) सकला देवास्- तस्थुर्येषां(न्) न सं(युँ)युगे ।
शुम्भादीनां(ङ्) कथं(न्) तेषां(म्), स्त्री प्रयास्यसि सम्मुखम् ॥ 125॥

सा त्वं(ङ्) गच्छ मयैवोक्ता, पार्श्वं(म्) शुम्भनिशुम्भयोः ।
केशाकर्षणनिर्धूत- गौरवा मा गमिष्यसि ॥ 126॥

देव्युवाच ॥ 127॥

एवमेतद् बली शुम्भो, निशुम्भश्चातिवीर्यवान् ।
किं(ङ्) करोमि प्रतिज्ञा मे, यदनालोचिता पुरा ॥ 128॥

स त्वं(ङ्) गच्छ मयोक्तं(न्) ते, यदेतत्सर्वमादृतः ।
तदाचक्ष्वासुरेन्द्राय, स च युक्तं(ङ्) करोतु तत् ॥ 129॥

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये
देव्या दूतसं(वँ)वादो नाम पञ्चमोऽध्यायः ॥

उवाच 9, त्रिपान्मन्त्राः 66, श्लोकाः 54, एवमादितः ॥ 388॥

